Shri Raghunatha Temple MSS. Library,
JAMMU

No. ११६६ घ

Title ब्रम्हयज्ञविधानम्

Author दिवाकरः

Extent ६ Age

Subject धर्मशास्त्रम्

ब्रह्मयज्ञविधानम्

११६६

नं० २२४६
ब्रह्मपद निर्वाण — ईशानशक्ति
संपूर्ण
धर्मविनायकी

ॐ अथ ब्रह्मयज्ञः ॥ ॐ श्रीगणेशाय नमः ॥ ॐ आचम्य प्रा
णानायम्य ॥ उदकं गृहीत्वा ॥ द्विः परिमृज्य ॥ सकृदुपस्पृ
श्य ॥ सव्यं पाणिं प्रोक्षति ॥ शिरः चक्षुषी ॥ नासिके श्रोत्रे
हृद॥यमालभ्य ॥ अप उपस्पृश्य ॥ विष्णुर्विष्णुः प्रणवस्य
भूर्भुवः स्वरों ॥ ॐ अद्य एवं ग्रहचरितेन एवंगुणविशेषण
विशिष्टायां ॥ शुभपुण्यतिथौ श्रीपरमेश्वरप्रीत्यर्थं ब्रह्म
यज्ञेन यक्ष्ये ॥ पृथ्वीत्यस्य मन्त्रस्य ॥ मेरुपृष्ठ ऋषिः ॥ कूर्मो
देवता ॥ सुतलं छन्दः ॥ आसने विनियोगः ॥ पृथ्वी त्वया धृ
ता लोका देवि त्वं विष्णुना धृता ॥ त्वं च धारय मां देवि

ॐ मं पाटी १

१

पवित्रं कृत्वा आसनं ॥ ओं अपसर्पन्तु ये भूता ये भूता भू
मिसंस्थिताः ॥ ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञ
या ॥ अनेन भूतान्युत्थाप्य ॥ अपक्रामन्तु भूतानि पि
शाचाः सर्वतो दिशं ॥ सर्वेषामविरोधेन ब्रह्मकर्म स
मारभेत् ॥ विद्युदसि विद्युमे पाप्मानमृतात्सत्य
मुपैमि ॥ तज्जलमभिमन्त्र्य दर्भगर्भे ब्रह्मांजलिं ॥
निधाय ॥ प्रणवस्य परब्रह्म ऋषिः परमात्मा देवता
देवी गायत्री छंदः ॥ व्याहृतीनां जमदग्निर्भरद्वाज
भृगवऋषयः ॥ अग्निर्वायुः सूर्यो देवताः ॥ देवी गाय

ओं गात्र २ त्रीछंदः॥व्याहृतीनांजमदग्निर्भरद्वाजभृगवऋषयः
अग्निर्वायुःसूर्योदेवताः॥देवीगायत्रीदेवीस्निकूदेवी उ२
बृहत्यछंदांसि॥गायत्र्याविश्वामित्रऋषिःसवितादे
वतागायत्रीछंदः॥पकेहृदेचशः॥ओंभूर्भुवस्वः ओं
2 तत्सवितुर्वरेण्यं॥ओंभर्गोदेवस्यधीमहि ओंधियो
योनःप्रचोदयात्॥ओंतत्सवितुर्वरेण्यंभर्गोदेवस्य
धीमहिःओंधियोयोनःप्रचोदयात्॥ओंअग्निमीळे
इत्यादीनांछंदसांमधुछंदादयोऋषयः॥अग्न्याद
योदेवताः॥गायत्र्यादीनिछंदांसि ब्रह्मयज्ञेजपेवि २

विनियोगः ॥ ॐ अग्निमीके पुरोहितं यज्ञस्य देवमृत्विजं
होतारं रत्नधातमं ॥ अग्निः पूर्वेभिरृषिभिरीड्यो नूत भिर
नैरुत ॥ स देवाँ एह वक्षति ॥ अग्निना रयिमश्नवत्पोषमे
व दिवेदिवे ॥ यशसं वीरवत्तमं ॥ अग्ने यं यज्ञमध्वरं विश्व तमम् ४
तः परिभूरसि ॥ स इद्देवेषु गच्छति ॥ अग्निर्होता कविक्र
तुः सत्यश्चित्रश्रवस्तमः ॥ देवो देवेभिरागमत् ॥ यदङ्
ग दाशुषे त्वमग्ने भद्रं करिष्यसि ॥ तवेत्तत्सत्यमङ्गिरः
उप त्वाग्ने दिवेदिवे दोषावस्तर्धिया वयं ॥ नमो भरन्त
एमसि ॥ राजन्तमध्वराणां गोपामृतस्य दीदिविं वर्धमा

ॐ मंत्र २ नं स्वेदमे॥ स नः पितेव सूनवेऽग्ने सूपायनो भवा॥ सच

स्वा नः स्वस्तये॥ वायवायाहि दर्शता॥ इषे त्वोर्जे त्वा॥ अ

ग्न आयाहि वीतये॥ शन्नो देवीरभिष्टये। अग्निर्वै दे

3 वानामवमो विष्णुः परमः॥ अथ महाव्रतं॥ एष पंथा

एतत्कर्म अथातः संहिताया उपनिषत्॥ विदा मघ

वन्विदा महाव्रतस्य पंचविंशतिं सामिधेन्यः॥ अथैत

स्य समाम्नायस्य समाम्नायः समाम्नातः॥ मयरसत

जभनलगसंम्मितं॥ पंच संवत्सरमयं॥ अथ शीक्षां

प्रवक्ष्यामि॥ गौः ग्मा॥ वृद्धिरादैच॥ अथातो धर्मं व्याख्या २

गातुं यज्ञाय गातुं यज्ञपतये दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषेभ्यः ऊ
र्ध्वं जिगातु भेषजं शन्नो अस्तु द्विपदे शं चतुःष्पदे ॥

स्णामः॥ अथातो धर्मजिज्ञासा॥ अथातो ब्रह्मजिज्ञासा
योगीश्वरं याज्ञवल्क्यं॥ नारायणं नमस्कृत्य॥ तच्छंयो
रावृणीमहे॥ ऋक्॥ नमो ब्रह्मणे॥ ऋक्॥ प्रजापति
स्तृप्यतु॥ ब्रह्मा तृप्यतु॥ वेदास्तृप्यन्तां॥ देवास्तृप्यन्तु॥
ऋषयस्तृप्यन्तु॥ सर्वाणि छन्दांसि तृप्यन्तु॥ ओंकार।
स्तृप्यतु वषट्कारस्तृप्यतु॥ व्याहृतयस्तृप्यन्तु॥ सा
वित्री तृप्यतु॥ यज्ञास्तृप्यन्तु॥ द्यावापृथिवी तृप्येतां
अन्तरिक्षं तृप्यतु॥ अहोरात्राणि तृप्यन्तु॥ सांख्यास्तृ
प्यन्तु॥ सिन्धास्तृप्यन्तु॥ समुद्रास्तृप्यन्तु॥ नद्यस्तृप्यन्तु

ऊं
नोत्र॰
५

गिरयस्तृप्यन्तु॥ क्षेत्रौषधिवनस्पतिगन्धर्वाप्सरसः स्तृ-
प्यन्तु॥ नागास्तृप्यन्तु॥ वयांसि तृप्यन्तु॥ गावस्तृप्यन्तु॥
साध्यास्तृप्यन्तु॥ विप्रास्तृप्यन्तु॥ यक्षास्तृप्यन्तु॥ रक्षां-
सि तृप्यन्तु॥ भूतानि तृप्यन्तु॥ एवमन्तानि तृप्यन्तु
उपवीति॥ अथ ऋषयः॥ शतर्चिनस्तृप्यन्तु॥ मा-
ध्यमास्तृप्यन्तु॥ गृत्समदस्तृप्यन्तु॥ विश्वामित्रस्तृ-
प्यन्तु॥ वामदेवस्तृप्यन्तु॥ अत्रिस्तृप्यन्तु॥ भरद्वाज-
स्तृप्यन्तु॥ वसिष्ठस्तृप्यन्तु॥ प्रगाथास्तृप्यन्तु॥ पाव- ५
मान्यस्तृप्यन्तु॥ क्षुद्रसूक्तास्तृप्यन्तु॥ महासूक्तास्तृप्यन्तु

प्राचीनावीति ॥ सुमंतुजैमिनिवैशंपायनपैलसू
त्रभाष्यभारतमहाभारतधर्माचार्यास्तृप्यंतु ॥ जा
नंतिबाहविगार्ग्यगौतमशाकल्यबाभ्रव्यमांडव्य
मांडूकेयास्तृप्यंतु ॥ गार्गी वाचक्नवी तृप्यतु ॥ वडवा
प्रातिथेयी तृप्यतु ॥ सुलभा मैत्रेयी तृप्यतु ॥ कहोलं
तर्पयामि ॥ कौषीतकं तर्पयामि ॥ महाकौषीतकं तर्प
यामि ॥ पैंगं तर्पयामि ॥ महापैंगं तर्पयामि ॥ सुय
ज्ञं तर्पयामि ॥ सांख्यायनं तर्पयामि ॥ ऐतरेयं तर्प

महोदवाहिंतर्पयामि ३ सौ॰
मिंतर्पय ३

ॐ ब्रजो॰ ५ 5

यामि ॥ [illegible] ॥ मंहिंतरेयं तर्पयामि
शाकल्यं तर्पयामि ॥ बाष्कलं तर्पयामि ॥ सुजातवक्त्रं
तर्पयामि ॥ औदवाहिंश्चीं तर्पयामि ॥ शौनकं तर्पया
मि ॥ आश्वलायनं तर्पयामि ॥ ये चान्ये अचार्यास्ते स
र्वे तृप्यंतु ॥ अथ पितृतर्पणं ॥ आब्रह्मस्तंभपर्यंतं देव
ऋषिपितृमानवाः तृप्यंतु पितरः सर्वे मातृमा
तामहादयः ॥ अतीतकुलकोटिनां सप्तद्वीपनि ५
वासिनां ॥ आब्रह्मभुवनाल्लोकान्नित्रनिष्पीडनोदकं
दिदमस्तु तिलोदकं ॥

इदमस्तुतितोदकं श्रवस्य॥ यस्य स्मरणा चनामोक्ष
न्मानतपोयज्ञक्रियादिषु॥ न्यूनं संपूर्णतां याति स
द्यो वंदे तमच्युतं॥ अनेन ब्रह्मतर्पणेन श्रीभगवान् परमेश्वरः प्रीयतां न मम॥ ॥ ॥ ॥

समाप्तः

॥९ केचास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः॥ ते गृह्णंतु मया दत्तं
वस्त्रनीपीडितोदकं॥२॥ मातामहकुले ये च सपत्नीजननीमातामह
दिन ये च ... जननी स्वभ्रातरः स्वस्त्रियः॥ ता
वा-म भगिन्यपत्यानि गुरुश्वशुरयापिनास ... शिष्याश्चापि ...